# श्रीसुरसरस्वतीसभा शृङ्गेरी

## तुरीया परीक्षा

## प्रथमपत्रिका

दिनाङ्कः - 28-08-2022 अङ्काः - 100

पूर्वाह्णे – 10:00 वादनतः 1:00 वादनपर्यन्तम् समयः – घण्टात्रयम्

<u>सूचना – सर्वाणि उत्तराणि संस्कृतेन एव लेखनीयानि</u>

**1 पञ्चानां एकवाक्येन उत्तरं लिखत । 5**

१. हनुमान् सीतामन्वेष्टुं लङ्कां कदा प्रविष्टः ?

२. फल्गुनः कः ?

३. प्रारब्धं के न परित्यजन्ति ?

४. विदर्भराजः कः ?

५. विभाण्डकमुनिसूनुः कुत्र अद्यापि तपः चरति इति प्रशस्तिः चकास्ति ?

६. शिवगुरुः प्रसन्नम् ईशं किं ययाचे ?

७. कौत्सस्य गुरुः कः ?

८. देवेन्द्रस्य सारथिः कः ?

**2 पञ्चानां त्रिचतुरैः वाक्यैः उत्तरं लिखत । 10**

१. पाठप्रारम्भाय विलम्बमानं गुरुं पद्मपादः किमभ्यधात् ? तन्निशम्य यतिक्षितीशः किं चकार ?

२. परिपूर्णशृङ्गः भगवान् शशाङ्कः चन्द्रः कथं रराज ?

३. नलः कं जग्राह ? गृहीतः सः नलं किमब्रवीत् ?

४. पाण्डुनृपेण ताडितः मृगरूपधरः ऋषिः तं किमाह ?

५. प्रसन्नः ईशः शिवगुरुं स्वप्ने किम् उवाच ?

६. ‘रघौ नाथे प्रजानाम् अशुभं न’ इत्यत्र दृष्टान्तः कः ?

७. मृगयायै वनं गतः उदयनः व्याधं किमवादीत् ? स च किं प्रत्यवादीत् ?

**3 द्वयोः विस्तरेण (सप्ताष्टभिर्वाक्यैः) उत्तरं लिखत । 8**

१. भगवता वेदव्यासेन उक्तं द्रौपद्याः पूर्ववृत्तान्तं वर्णयत ।

२. दमयन्त्याः स्वयंवरदिने किम् अभूत् इति वर्णयत ।

३. एकचक्रनगरे वसतः पाण्डवान् यदृच्छयागतो विप्रः किम् उवाच ?

४. हस्तामलकस्य पूर्ववृत्तं वर्णयत ।

**4 वाक्यत्रयं सप्रसङ्गं विवृणुत । 9**

१. "तस्मात् त्रायस्व मां देवताविरोधकृताद्भयात्"।

२. "ग्रहाणां गतिरधुना प्रतिकूला नो दृश्यते"।

३. "राजन्! तव शापस्य विमोचनकालस्सन्निहितः"।

४. "भोः कुमाराः! पश्यत मे कौशलम्"।

५. "मा च मे पुत्रस्य तेन पापम् आशङ्किष्ठाः"।

**5 द्वयोः भावं विशदयत । 8**

१. यस्य चेतसि वर्तेथाः स तावत्कृतिनां वरः ।
किं पुनर्ब्रह्मयोनेर्यस्तव चेतसि वर्तते ॥

२. व्याघ्रीव तिष्ठति जरा परितर्जयन्ती रोगाश्च शत्रव इव प्रहरन्ति देहम् ।
आयुः परिस्रवति भिन्नघटादिवाम्भः लोकस्तथाप्यहितमाचरतीति चित्रम् ॥

३. श्रीमान् मुदा शुभतमेऽहनि चारुनाम चक्रे पिता सपदि शङ्कर इत्यमुष्य ।
अन्वर्थनाम भुवि शङ्करणेन यद्वा शं सर्वदा करवशं ध्रुवमस्य भावि ॥

४. सर्वत्र नो वार्तमवेहि राजन् नाथे कुतस्त्वय्यशुभं प्रजानाम् ।
सूर्ये तपत्यावरणाय दृष्टेः कल्पेत लोकस्य कथं तमिस्रा ॥

**6 श्लोकमेकं पूर्णं लिखत । 4**

१. यद्धात्रा .................. जलम् ॥

२. आयुः ...................... प्राणिनाम् ॥

**7 एकस्य कवेः देशकालकृतिमहत्त्वादीनां विषये लिखत । 4**

१. कालिदासः        २. लक्ष्मणसूरिः

**8 एकस्य लघुटिप्पणीं लिखत ।** **4**

१. एकचक्रनगरम् २. चन्द्रोदयवर्णनम्

**9 चत्वारि पदानि वाक्ये योजयत ।** **4**

१. मृगादनः २. आत्मना ३. मित्रम्
४. असकृत् ५. बभूवतुः ६. धूमकेतुः

**10 चतुर्णां रूपाणि विवेचयत ।** 4

१. पृथे २. यते ३. वस्तुम्
४. दुर्वासाः ५. पेतुः ६. मघोना

**11 चतुर्णां पर्यायपदानि लिखत ।** **4**

१. भुजिष्या २. सपदि ३. ओघः
४. विविक्ते ५. जाम्बूनदम् ६. क्षितीशः

**12 चतुर्णां विग्रहवाक्यं विलिख्य समासनाम लिखत ।** **4**

१. सरोरुहाक्षी २. प्रलयस्थितिसर्गाणाम् ३. पञ्चनली
४. निशाकरस्था ५. मदान्धः ६. पञ्चषाः

**13 चतुर्णां सन्धिं विभज्य नाम लिखत ।** **4**

१. भगवन्नस्ति २. उड्डीनो गरुडः ३. सार्था
४ बलान्माद्रीम् ५. सुमहत्येषा ६. यावच्च

**14 द्वयोः तत्तल्लकारे पुरुषत्रये सर्वाणि रूपाणि लिखत ।** **6**

१. रराज २. विद्योतते ३. अकरोत् ४. मन्येत

**15 द्वयोः व्याकरणविशेषं लिखत ।** **4**

१. अन्तर्वत्नी २. मा वधीः ३. उपतस्थिरे ४. व्यजयत

**16 समासमेकं सलक्षणं विशदयत ।** **4**

१. कर्मधारयसमासः २. द्वन्द्वसमासः

**17 चतुर्थं पदं लिखत ।** **4**

१. कुमारसम्भवम् – कालिदासः :: नीतिशतकम् – __________

२. हस्तिनापुरम् – शन्तनुः :: कौशाम्बी – __________

३. शङ्कराचार्यः – पद्मपादः :: जामदग्न्यः – __________

४. उपनदम् – अव्ययीभावः :: त्रिलोकी – __________

**18 इतरवचनानि लिखत ।** **4**

१. अधीयन् _______ _______ ।

२. मघवता _______ _______ ।

३. _______ पुष्पवन्तौ _______ ।

४. निमज्जयेयम् _______ _______ ।

**19 रिक्तस्थानानि पूरयत ।** **4**

१. सा च जीयात् ____________ ।

२. ____________ धर्ममवाप्नुहि ।

३. क्लेशापहाय ____________ पार्थसारथये नमः ।

४. __________ एवैकः हेतुस्ते जन्मकर्मणोः ।

**20 प्रयोगपरिवर्तनं कुरुत ।** **2**

१. नागराः तान् एव अन्वधावन् ।

२. इन्द्राग्नियमवरुणाः चत्वारः देवाः त्वां प्रार्थयन्ते ।

-------------------------